ल्क्यः त्रयामरणं विषाद्युग्दिष्टिसरीसृपैः॥ अंत्याभजं विषोद्बंधरामनाभे वताडनैः स
हर्ष्यसर्वगात्राणां विषाकर्षीतापिवा जनाग्निशार्जपतेश्च निराहारादिभिस्तथा॥ ए
षामेव जाबालोत्रिकथिताः पापकर्मिणः॥ पाखंडमाश्रिताश्चैव॥ महापातकिनं स्त्रिया
स्त्रियश्च व्यभिचारिण्यमायुधपतिताश्चाश्वा॥ नतेषां स्नानसंस्कारान् श्राद्धं न सपिंडता
ति॥ अंत्यजा ग्रामांत्यजाः॥ अंत्यजा बहिरंत्यजाः॥ विधिविनेवतप्रकिविधिना अनशना
दिमरणेपिन कालविलंबः॥ तदाह शातातपः॥ वृद्धः शौचक्रियाशक्तः प्रत्याख्यात भिषक्कि

यः आमानषातायथस्तुस्नस्यप्राशनांतु जिः॥ तस्य त्रिरात्रमाशौचं द्वितीयस्य छिसं
वयं तृतीयतदकं दद्याच्चत्रास्य श्राद्धमाचरदिति॥ अत्र कामाति फाल्कअकाम
तश्चुंडालादिन्निमरणे पिनद्वादविलंबः॥ तदाहांगिराः अष्टक क्षित्प्रमादनन्त्रि
यताम्यादकादिति॥ तस्या शौचं प्रदातव्यं कृतीयाद्वादकक्रियति॥ अत्र वि
शेषमाह॥ अनाकस्मितिवार्तश्चाप्राषितास्य पितुः स्तुत॥ ऊर्ध्वं पंचदशाद्वर्षाद्दिवीदर्हि
कमाचरेत्॥ अनाकस्मिन्वार्तश्च अश्रुत कुशलवर्तिस्य प्राषितस्यादशांतरगतस्य
पितरोर्ध्वदैहिकं स्तुतः पंचदशाद्वर्षाद्ध्वंमाचरेत्॥ पंचदशसुवत्सरेषु कुर्यादित्यर्थः॥
तदाह जातकर्णः॥ पितरि प्रोषिते यस्य न वार्तानिवर्तागतिः॥ ऊर्ध्वं पंचदशाद्वर्षाद्
र्ध्वदैहिकमाचरेत्॥ अनाकस्मितिवार्तस्य जीवतस्तप्रतिरूपकं॥ कुर्यात्तस्य वसंस्कारं १०७

स्याद्ध्विधिना ततः॥ तदानीमवसर्वाणिप्रतकार्याणिमंचारत्॥ पितृव्यतिरिक्तविष
यविशेषमाह॥ अन्यषांद्वादशाद्वर्षादूर्ध्वमौर्ध्वदैहिकवतत्क्षिपिः॥ अन्येषां पितृव्यतिरिक्तानां
पितृव्यभ्रातृपुत्रादीनां द्वादशाद्वर्षादूर्ध्वं पित्र्यमौर्ध्वदैहिकमाचरेत्॥ तदाह वृहस्पतिः॥ यस्य न
श्रूयते वार्ता यावद्द्वादशवत्सरं॥ कुशपुत्रकदाहेन तस्य स्यादवधारणमिति॥ कश्चि
नपेटामधिकमित्यत्राह॥ तत्त्रिपक्षः पूर्ववदौर्ध्वदैहिकवतश्चापेटामधिकश्चानुष्ठानतिथिः॥
मासाज्ञाने दिनज्ञानादिनादित्यादिनाः पूर्ववदौर्ध्वदैहिकवाप्रोषितस्य प्रत्याब्दिकश्राद्धयादि
थिः॥ सिवत्याद्युपलक्षः॥ पंचदशाद्वादशाद्वा वासिना कर्मनि मरणनिश्चयाद्दाहादि
दिक कृत्वा जीवत्युदिसमागच्छेत् तदाकथमित्यत्राह॥ यदागच्छेत् मानजीवनेपरमाधि
कसंस्कृतः॥ घृतकुंभेपिमज्जापयित्वा तूद्धृत्य स्नाप्य जातकर्माद्युपनीतंविधा

ननः द्वादशाहं त्रिपात्रं वा विहिताप्पाषणं व्रतं । गिरावागत्य स्वदेवा तद्दत्ता द्वपरां स्त्रियं
उद्वहंतं च संस्कुर्याच्चिरुणा तु अतनचाप्याषितः पेटाम विाकन कर्मणा संस्कृतः तु मार
जीवच्यागाच्छ तु तदात मागतं कृतकं लत्वा पयित्वा श्राज्ञद्वाणा द्वाति शास्त्रमाधु
तया निर्दिष्ट लग्न उक्तप्रश्च जातकर्मादिभिः जातकर्मान्न प्राशनचूडाकरणैः संस्कृत्य
विधानतः उपनीतं दंडगो जीवयनादिवज्ञ निविक्षिनापनीतं यस्मिन् कस्मिन्द्यागि
राद्वादशाहं विहितापाषणं व्रतं कृतापवासं व्रतं आगत्य गिरिरागत्य स्वर्वासि वप
रिणीतां प्रियमूढवंतं । तद्दत्ताव तस्य श्राद्धसत्ताव अपरां स्त्रियमूढवंतं । आयुष्मतेन वरुण
संस्कुर्यात् । अग्नये आयुष्मंते पुरोडाशमष्टाकपालं कुर्यादिति शास्त्रविहितानायुष्माद्ध
वता किं न वरुणेन संस्कुर्यात् । आहिताग्नेः पुरोडाशः अनाहिताग्नेश्चरुः । तदुक्तं गृह्या
१०८

हि०

हि०
यहिताग्नेः यएवाहिताग्नेः पुरोडाशः सएवानाहिताग्नेश्चरुरिति । तदाह हेमाद्रिः जी
वनादिसमागतस्य कृत्तकं तं निरायाजतं तत्सुव्यस्नापयित्वा श्राद्धजातकर्मादिकारायेत् ।
द्वादशाहं गतस्त्वयां त्रिरात्रमथवा स्यात् ह्नात्वा द्वादहत तां नायमिन्यां वा तद्दनावत । अ
ग्नीनाधाय विधिवद्व्रात्याष्टोमेन वा यजेत् । अथ श्राद्धनपक्षेनागिरंगयाचत त्र उभ
मायुष्मतीं कुर्यादीक्षितायश्च वह्नौ व्रतइति । सापिंड्यएव विशेषमाह आशौचं कालमहा
रौ० शौचं विश्यानां च सपिंडनं शूद्राणां द्वादशाहं कुर्यात्तिकालेनः श्रुतिः राज्ञां विश्यानां आशौ
चांतसपिंडनं नावत । द्वादशाहनियमानाम्नी त्यथ इति तदाह हेमाद्रिः द्वादशाहनि विप्रा
णामाशौचांते षु क्षत्रियविश्यानां च त्रिपक्षाद्वा वत्सवाश्च सपिंडनमिति । अथवा विप्रा
त्रियविशां त्रिपक्षादिकालेषु सपिंडनं स्यादित्यर्थः । शूद्राणां द्वादशाहिकं एतत्सपिंडनं त्वावत् ।

न वा। शोचमाह। न स्नुविः कथं कुर्यादित्यत्राह। कालेतिकर्त्ति कालतः तत्कालश्चिं॥
तकालतश्रुतिसप्तम्यर्थेति शिलः। तदाह विष्णुः। मंत्रवर्ज्यं हि शूद्राणां द्वादशेऽहनि सपिंडन
मिति। यत्तु कात्यायनवचनं। सर्वेषामेव वर्णानामाशौचांते सपिंडनमिति। तद्विश
षविषयत्वेन विष्णुवचनेन बाधितं। शूद्रव्यतिरिक्तविषयं वा। एवं तिथ्यातौ। यत्तु गोभिलव
चनं। अनुक्तकालपृथक्त्वे अतिक्रामणस्तावपि आमेनवापि सापिंड्यं दत्त्वा वापि वच
ल्पादिति। तदन्यापद्विषयं। दर्सविल्ल वादिनिमित्तायामत्यंतापदि उक्तं द्वादशाहादिकाल
भावमूलत्वे पित्रायतिरिक्तस्य श्रुक्तमरणेपि आमेन स्त्रवाऽसनिवासपिंडीकरणोक्तामा
र्यादिहिकं कुर्यादितिपुरुषः। सापिंड्यस्य विशेषमाह उक्तेषु कालेष्वतं सापिंड्यं यदिमि
त्रातो रा द्विपीरोऽद्दहस्तेषु तत्कुर्यादितिनिश्चयः। उक्तं इति तावच्छेषः। तदाहरुरुशृंगः। १०५०

२ तं सपिंडीकरणं यन्न प्रमादात्ततस्तत्त्ववत्। अरुराक्षद्वंहस्तेषु राहिण्या वा समाचरत्। गा
लावापि सपिंडीकरणश्राद्धं मृतकालेन त्वकृष्टं। रोदहस्तेषु राहिण्यां मोत्र लवा समा
चरत्। इति सपिंडीकरणप्रकरणं॥ अथ एकोद्दिष्टं। अथ मासादि एकोद्दिष्टं उम नि २
श्राद्धे नव श्राद्धं दिकं चारतां नव श्राद्धादिकामेकोद्दिष्टं मध्याह्नाचारतां तस्य ह दैवलः पू
र्वाह्ने दैविकं कर्म विपाराह्ने तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने तदह्नि निमित्तकमिति। गाल द्धू प्रा
वापि पूर्वाह्ने त्वेवम ध्याह्ने चापराह्ने चापराह्ने च यद्देविकं। एकोद्दिष्टं पार्वणं तत्वृद्धिश्राद्धं
उत्तानिकमिति। अत्र कामोत्तमापि आरभ्य कृतायश्राद्धं कुर्यादापराह्णं तु क्षः। द्विविक्षे
दिक्षिमाध्याह्नव्यापराह्निर्णतेन लंबायत्। पराह्निणं लंबायथा नृतोऽनादृशोनाताप्पिवा। आमु
रंतकृत्वत्रश्राद्धं पिरणं नापतिष्ठति। यत्तु केचिदुक्तं नाकवलमेकोद्दिष्टं श्राद्धं पार्वणं श्रा

न्मपि। कृतापरारब्धं रौहिणं समापयेदिति। ननु कृतापरारंभः पार्वणश्राद्धस्या
नुमत्यामादौ कृतापरारंभविधानात् तदुक्तं मत्स्यपुराणे। अह्नो मुहूर्ता विख्याता दश
पंच च सर्वदा। तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः। अष्टमो नाम कुतपः मध्यान्दी
भवति सर्वदा। तस्मादनंतफलदस्तत्रारंभो विशिष्यते। अष्टमो मुहूर्तः कुतपाद्यन्मुहूर्तच
तुष्टयं मुहूर्तपंचकं प्रोक्तं स्वधाभवनमिष्यत इति। ननु रौहिणे समाप्तिविधानमप्य
स्ति तदाह मार्कंडेयः कुतपप्रभृत्यूर्ध्वं श्राद्धं कुर्याद्विचक्षणः। कुतपप्र... रौहि
णं तु न लंघयेदिति। सत्यं वासरस्य तृतीयांशेनातिसंध्यासमं ... इति। वचनविरो
धात् तद्वचनमपराह्णविषयमेव वक्ष्यामः। न चामावास्यायामपराह्णव्याप्त्यापि
च दर्शश्राद्धं कृतापरारब्धं रौहिणं समापयेदित्युक्तं। सत्यं। पूर्वाह्णिकाद्यप्रतिपदइति। ११०

विशेषवचनबलेन तद्विधेयविषयत्वादित्युच्यते। अतः सर्वपार्वणविषयत्वं रौहिण
समापनस्य शब्दात् वक्तुं। तानेकोद्दिष्टविषयत्वात् दर्शश्राद्धविशेषविषयत्वाद्वेति
श्रयः। ननु वाक्यं पंचदशमुहूर्तमहिन्युक्तं। तैनासह ... भागितया न्यूनाधिक्य
संभवात् मुहूर्तशब्दोऽत्र भागपरः एवं च वाक्यं पंचदशभागा इति वचनार्थः। ततश्चापरास्त्रिंश
त्त्वघटिकादिवसः तदा मुहूर्तपरिमाणं रामा। यदा त्रिंशद्घटिकाद्रूपपरिमाणाद्यूना
धिको दिवसः तदा मुहूर्तपरिमाणं न्यूनाधिकं। यदा तस्मात्परिमाणादधिका दिवसः तदा त
क्षिका दिवसः नागा इत्युत्संख्येयं। एवं चानागोऽद्वादशनाडीत्रिहद्गृहं पंचदशत्रिंशत्का।
मुहूर्ताद्वादशनाडीत्रिहद्विषयत्वमपरांतिस्थिरं मित्यादिशब्दपि नागाद्वादशनागाहद्गृहं पंच
दशनाहृताद्वादशनागोऽरिव्यर्थः ग्राह्यः। ननु वाक्यानन्तराद्वादशनाडीत्रिहद्विषय

त्पूर्वां तिथिमित्युक्तं। कर्म द्वादशनाडीबाध्यक्रिः। श्राद्धविषयत्वाद्दशनाडीबाध्यक्रि
रिति विषयात्तदाह वृद्धवसिष्ठः। तदुक्तं तत्र विष्णुपुराणे। द्वादशाह्नादशांशेयं कृत्वास्य
विधानं श्राद्धं व्रातषु विक्रयमुत्तरं श्राद्धकर्मणीति। इत्येकोद्दिष्टप्रकरणं। ८॥ नैमि
त्तिकनिर्णयमाह। नैमित्तिकं तु यच्छ्राद्धं निमित्तानंतरं भवेत्। नाडीमुखाख्यं प्रा
तराग्निकं च पराह्णतः। यच्छ्राद्धं नैमित्तिकं तन्निमित्तानंतरं भवेत्। तु शब्द एकोद्दि
ष्टाद्यमध्याह्नव्यावर्तकः। नांदीमुखाख्यं श्राद्धं प्रातः पूर्वाह्णे भवेत् न तु प्रातः शब्दः
संगवपूर्ववर्तिकालपरः। तदुक्तं तस्य पूर्वाह्णपरत्वं। सत्यं पूर्वाह्णपरमिति श्रुतिषु प्रती
तौ। तदाह गार्ग्यः। ललाटसंमितं भानौ प्रथमः प्रहरः स्मृतः। तत एव वाध्ये संस्कृतः प्रात
रियत्तिधीयत इति। आग्निकं तु त्वरप्रहराद्यधनि संयुक्तः। तदाह शातातपः। आमश्राद्धं ११२

तु पूर्वाह्णे एकोद्दिष्टं तु मध्यमे। पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तक इति। एवं सा
नाडीमुखस्य प्रातःकालप्रसक्तौ विषयमाह। आग्निकं च पराह्णे इति अपरा
इति। सप्तपञ्चानेति शीलः। आग्निकमपसुत्वन्निमित्तिकं श्राद्धं न निमित्तमित्यर्थः।
पराह्णे भवेत्। तदाह गालवः। आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः पार्वणं
चापराह्णे तु वृद्धिश्राद्धं तु लाग्निकं। सिद्धान्नेन तु मध्यतः एकोद्दिष्टविषयं। नन्वनैमि
त्तिकं निमित्तानंतरं इति न युक्तं। नैमित्तिकस्यापि वृद्धिश्राद्धस्य पूर्वाह्णपराह्णादाया
विधानात्। अथ पुत्रजन्मनिमित्तस्य ग्रहणनिमित्तस्य च निमित्तानंतर्यमस्तीति
चेत् सत्यं। विवाहोपनयनादिनिमित्तस्य तदानंतर्यनियमाभावात्। अतो निमि
त्तानंतरं नैमित्तिकमिति सामान्येन वक्तुं न शक्यते। अत्र नियतनिमित्तं श्राद्धं तु

वीक्ष्व अनियतनिमित्तं तु श्राद्धं निमित्तानंतरमिति तावत्। रनिमित्तस्य नियतत्वानि
यतत्वाभ्यां निरूपयितुमशक्यत्वात्। अथावश्यंभावित्वं नियतत्वं अनवश्यंभावित्वं
मनियतत्वमिति चेत्। न पुत्रजन्मादेर्निमित्तस्यावश्यंभावित्वात्। अस्य मया वि
वाय पुत्रजन्मनिमित्तस्यावश्यंभावित्वं नास्तीति चेत्। न द्विवित्तरागविषयविवा
हस्य नियतितिर्नास्ति मुमुक्षादिविषयउद्वहनयनस्य नियतिर्नास्तीति विवाहादि
निमित्तस्याप्यनियतत्वं स्यात्। अथ विवाहादेर्नियतकालत्वं नियतत्वं पुत्रजन्मा
देरनियतकालत्वादनियतत्वमिति चेत्। न विवाहस्य यातकमासस्थानकनक्ष
त्रेषु क्रियमाणतया नियतकालत्वाभावात्। तस्मान्निमित्तस्यानियतत्वानियतत्वा
निरूपयितुं न शक्यते। अत्राभिधीयते। नियतकालत्वादेव निमित्तस्यानियतत्वं अस्या ११२

२८

तिः। आम्नोक्तं उ मासपक्षतिथिनक्षत्रलग्नग्रहतिवाराणां वा कालस्य नियतिः। पुत्र
जन्मनस्तु शास्त्रोक्ततिथिनक्षत्रग्रहतिवाराइ नियतकालतया अनियतत्वं। एवमद्य
नापि नियतत्वानियतत्वाउन्नयाय। अत्रालो नियतनिमित्तं प्रातः। अनियतनिमित्तं नि
मित्तानंतरमिति निश्चयः। तद्दाहलोकादिः। नियतस्तु निमित्तेषु प्रातरह्नि निमि
त्तकं। तेषामनियतत्वाच्च तदानंतर्यमिष्यत इति। अत्रिरपि। पूर्वाह्ने वै भवेद्वृद्धिर्वि
नाजन्मनिमित्तकं पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुध इति। पुत्रजन्मनीत्यनि
यतनिमित्तोपलक्षणं। तात्कालिकं पुत्रजन्मानंतरं तद्दाहकाद्याडिनिः। प्राङ्नावि
पुत्रप्राप्त्यर्थं ग्रहणचंद्रसूर्ययोः। स्नात्वानंतरमामीयान्पितॄन् श्राद्धेन तर्पयेदिति।
नांदीमुखनिमित्ताद्यात्। सीमंतव्रतचोलनामकरणान्नप्राशनोपनायनस्नानाद्यश्च

नविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च। पुंसूत्यावसथप्रवेशनसुतातीर्थाश्रावलो
काश्रमश्रीकारक्षितिपाभिषेकदयिताद्यर्त्तुष्विनां दीमुखं। शीमंतं शीमंतोन्न
यनं। व्रतानि प्राजापत्यादि यावत् अश्वत्थादि। गोदानव्रतानि। चौलं चूडाकरणं
नामकरणं सुतस्य सुतायाश्च। नाम निर्देशः। अन्नप्राशनं सुतस्य सुतायाश्च प्रथमा
न्नाद्यभोजनं। उपायः उपनयनं। स्नानं समावर्त्तनं। आधानमग्न्याधानं। विवाहः सुतस्य
सुतायाश्च। यज्ञः दर्शपूर्णमाससोमादि। तिष्ठेमादि। तनयोत्पत्तिः तनयस्य तनया
याश्चोत्पत्तिः। प्रतिष्ठा सुदेवताविषयप्रतिष्ठाश्च। वापीकूपतडागारामादि
प्रतिष्ठाश्च। पुंसूतिः पुंसवनं। आवसथप्रवेशनं। सुतातीर्थाश्रावलोकः। राज्ञाभिषे
कः। दयिताद्यर्तुः दयितानायिकायाः। आद्यर्तुः प्रथमरजः प्रादुर्भावः। पुंसुतादिदयिता ११२

द्यर्त्तुः पर्यंता द्वंद्वः समासः एकवद्भावः। एतेषु निमित्तेषु नांदीमुखं कार्यमित्यर्थ
यः। तदाह हलाकाजिः। नामान्नचौलगोदानसीमापनयनः पुंसवनस्नानाधानविवा
हेषु नांदीश्राद्धं विधीयत इति। गोदानशब्देनेह उपवीतापलक्षकः। कार्ष्णाजिनिरपि क
ग्राम्पुत्रविवाहेषु प्रवेशने वा वेश्मनः। नामकर्मणि बालानां चूडाकर्मादिके तथा। सी
मंतोन्नयने चैव पुत्रादिमुखदर्शने। नांदीमुखान् पितृगणान् पूजयेत्प्रयतो गृही
ति। आदिशब्दात् पुत्रीमुखदर्शनाद्युपसंग्रहः। गार्ग्यः। पुत्रोत्पत्तिप्रतिष्ठासु तन्मौंजीया
गबंधने। चूडायां च विवाहेषु वृद्धिश्राद्धं विधीयत इति। वृद्धगार्ग्यः। अग्न्याधानाभिषे
कादौ विष्णुबलौ क्रियायां। वृद्धिश्राद्धं प्रकुर्वीत आश्रमग्रहणे तथा। इति निमित्तिक
नियमकरणं प०॥ काम्यश्राद्धनिर्णयमाह। पस्तात्तोपार्श्वतिथिषु वर्जयित्वा चतुर्दशीं

काम्यादिकामिनः कुर्याच्छ्राद्धं पार्वणविधर्मवित् । कन्यादिकामिनः । कन्याकन्यादिवेदिन
इत्यादिवचनात् कृष्णचतुर्दशीफलकामिनः । पक्षे प्रत्यहं प्रतिपत्प्रभृतिषु तिथिषु प्रतिपत्प्रभृतिषु पार्व
णविधानेन श्राद्धं कुर्युः । पक्षश्राद्धमिति प्रतिपत्तुः । सामान्याध्यायासां तत्र पक्षश्राद्धा । स्नातु । न
चतुर्दशफलकामिनः पंचदशसु तिथिषु कृष्णं कृष्णं कुर्यादित्यत्राह । उपयोगिनीति । च
तुर्दशीं वर्जयित्वा इतरासु चतुर्दशसु तिथिषु स्त्रियन्त्यः । तथाह याज्ञवल्क्यः । कन्यां कन्या
वेदिनश्च पशून् वै सत्सुतानपि । द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा । ब्रह्मव
र्चस्विनः पुत्रान् स्वर्णरौप्ये सकुप्यके । ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा । प्रतिपत्प्र
भृतिष्वेकां वर्जयित्वा चतुर्दशीमिति । कन्या सर्वलक्षणसंपन्ना । कन्यावेदिनः सर्वल
क्षणसंपन्ना जामातरः । पशवः क्षुद्रपशवः छागादयः । तत्सुत इत्यन्वयः । सुताः सन्मार्गवर्तिनः ११४

द्यूतं द्यूतविज्ञायं कृषिं कृषिनिमित्तलाभं वाणिज्यं वाणिज्यनिमित्तलाभं । द्विशफाः
गवादयः । एकशफाः अश्वादयः । ब्रह्मवर्चस्विनः वेदाध्ययनतदर्थानुष्ठानजनितं तेजो
ब्रह्मवर्चसं । तद्युक्ताः पुत्रान् । स्वर्णरौप्ये हेमरजते कुप्यकं त्रपुसीसादि । ज्ञातिश्रैष्ठ्यं बं
धुषु श्रेष्ठत्वं । सर्वकामान् काम्यन्त इति कामाः । सर्वकामानुक्तव्यतिरिक्तपश्वादीन् कामांश्च
माह । कृत्तिकादिषु धिष्ण्येषु भरण्यंतेषु पार्वणं कुर्याच्छ्राद्धं श्राद्धदानाः स्वर्गादिफलका
मिनः । स्वर्गं ह्यपत्यमित्यादिवचनात् फलकामिनः । कृत्तिकादिनक्षत्रेषु भरण्यंतेषु
पार्वणं श्राद्धं कुर्युः श्राद्धदानाः श्रद्धावंतः । तथाह याज्ञवल्क्यः । स्वर्गं ह्यपत्यमोजश्च शौर्यं
क्षेत्रं बलं तथा । पुत्रान् श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभं । प्रवृत्तचक्रतां चैव वाणिज्य
प्रभृतीनपि । आरोग्यं यशो वीतशोकतां परमां गतिं । धनं वेदान् भिषक्सिद्धिं कुप्यं गामप्यजाविकं

अश्वानायुश्च विविधिष्ठा वा श्राद्धं प्रयच्छति। कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमानि-
ति। स्वर्गं निरतिशयसुखं। अपत्यं पुत्रं। पुत्रं विशिष्टं। अन्न आमशक्त्यतिशयं। शौर्यं नि-
र्भयत्वं। क्षेत्रं बीजाधिफलवत्। फलं शरीरदाढ्यं। पुत्रान् गुणवतः। श्रेष्ठ्यं वंशमुख्यत्वं। सौ-
भाग्यं जनप्रियत्वं। समृद्धिं धनधान्यादिसंपदं। मुख्यता मध्ये दक्षत्वं। शुभं संमार्गप्रवृ-
त्तत्वं कृता। अप्रतिहताज्ञत्वा वाणिज्यप्रवृत्तीन् वाणिज्यं कृषिकुसीदगोरक्षादि। आरोग्यं
व्याधिरहितत्वं। यशः ख्यातिं। वीतशोकतां इष्टवियोगजनितदुःखरहिततां। परमां गतिं ब्र-
ह्मलोकप्राप्तिं। धनं सुवर्णादि। विद्यां वेदादि। रूप्यं। दादीन् निषेकसिद्धं। अथ सप्ताफल्यं। कुप्यं सुव-
र्णरजतव्यतिरिक्तं ताम्रादि। गां क्षुद्रपशून् अजाविकादीन्। अश्वान्। आयुः दीर्घजीवित्वं कामम-
माहः। विष्कुंभादिषु योगेषु फलं नन्दन्तवत्स्मृतं। विष्कुंभादि योगयुतादेव फलमिति ते ११५

इति कात्यायनस्मात्। श्राद्धं रव्यादिवारेषु आरोग्यादिफलं नरः। कुर्युः फलमिदं कृयं
रवादिकरणेषु दि। आरोग्यादिपालं तु आरोग्यं विवासो जयमित्यादिवदानां फलं
त्यादिफलकामिनः रव्यादिवारेषु श्राद्धं कुर्युः। रवादिकरणेषु श्राद्धकारणपीदं फलं
ज्ञेयं तदाह बृहस्पतिः। आरोग्यं विवासो जाड्यं शत्रूणां च पराजयं। सर्वान् कामान् प्रियान्
विद्यान् धनं मानं च यथाक्रमं। रव्यादिदिवसेष्वेतत् श्राद्धं कृत्वाप्नुयात्फलमिति॥ ठ॥ इतिका-
र्य श्राद्धप्रकरणमाकाहिष्ठादिश्राद्धप्रकरणं॥ ठ॥ श्रीकाः॥ प्रसंगाच्छ्राद्धसंबंधिविशे-
षमाह। श्राद्धं विविधमुद्दिष्टमाकाहिष्टं च पार्वणं। नित्यं नैमित्तिकं काम्यमिति। तत्र श्राद्धस्वरू-
त्रिधा। पृता। ब्राह्मणपित्रुद्देशेन वा अदनीयद्रव्यस्य श्रद्धया यस्त्यागः स श्राद्धं। तदाह म-
रीचिः। प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत् प्रियमात्मनः। श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्ति-

११६ तमिति। तच्छ्राद्धमाकाङ्क्षितं पार्वणश्राद्धप्रकृतिविषयमुद्दिष्टं। एकमुद्दिश्य यद्दीयते तत
देकोद्दिष्टं। त्रिपुरुषानुद्दिश्य यद्दीयते तत्पार्वणं। तदाह कात्यायनः। एकमुद्दिश्य यच्छ्राद्धं
तमेकोद्दिष्टं तदीरितं। त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुरिति। तच्चैकोद्दिष्टं पार्व
णं च प्रत्येकं नित्यनैमित्तिककाम्यरूपेण त्रिधा त्रिप्रकारं भवति। जीवनाय यद्दीयते तं अह
११६ रहः श्राद्धं दर्शश्राद्धादि च नित्यं। तदाह कार्ष्णाजिनिः। मृताहहरहश्श्राद्धं च यज्ञमहाल
यं। तं नित्यमुदितं। श्राद्धं नित्यं वक्तव्यं विधानतः इति। नवश्राद्धमृत्तिका सपिंडीकरणं तन्मृत
श्राद्धं ग्रहणेषु संक्रान्तिषु च श्राद्धं संवत्सरादर्वाक्तनश्राद्धं च नैमित्तिकं। तदाह गालवः। प्र
तश्राद्धं सपिंडान्तं संक्रान्तिग्रहणेषु च। संवत्सरादर्वाक्तनं चैव द्वि श्राद्धं नैमित्तिकं तदिति। तीर्थ
नक्षत्रयोगवारकरणेषु मन्वादियुगादिषु अलभ्ययोगेषु अक्षय्यादिषु यच्छ्राद्धं तदा ११६

म्यं। तदाह गालवः। तिथ्यादिषु च यत् श्राद्धं मन्वादिषु युगादिषु। अलभ्ययोगेषु गयायागेषु
तत्काम्यं समुदाहृतमिति। यत्तु स्मृत्यन्तरे। नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमतः परं। पा
र्वणं चेति विज्ञेयं श्राद्धं पंचविधं बुधैरिति। तथा। अहश्श्राद्धमहरहः श्राद्धं पार्वणं तु वृद्धिसंज्ञ
कं। एकोद्दिष्टं सपिंडाख्यमिति पंचविधं विदुरिति। तदा पात्रः शास्त्रपरमार्थतः पांचविध्यम
संतवादित्यविधेयं। कृष्णपक्षाष्टकादशाहवृद्ध्यादित्यसंक्रमः। तं दृष्ट्वा य ग्रहोपातः
श्राद्धच्छायागजच्छाया कुविः। प्रेतविपिंडद्यसंपत्कालाशिष्यादि पंचकं। कृष्णपक्षो महाल
यः। भाद्रपदमार्गशीर्षपौषमाघफाल्गुनमासकृष्णपक्षेषु सप्तमी नवमी अष्टका अष्टकाः
दर्शश्रमावास्या वृद्धिः पुत्रजन्मसीमन्तादि आदित्यसंक्रमाः मेषादयो द्वादश सुदृसं
क्रमाः। तं दृष्ट्वा यव्यतीपातः। श्राद्धच्छाया यदा पिंटसच्छाया श्राद्धं करिष्यामीति

यात्। गजच्छाया विगंडिच्छाया। यादृक् पितृदेवात्यंतं सावश्यकारश्लितः। यामातिथ्यिन्नवित्या
दिगजच्छाया प्रकीर्तिता। सुच्छाया गजच्छाया। कृतिर्मृतिशब्देन मरणदिनादारभ्य विषमति
थयः एकादशाहद्वादशाहः प्रतिमासं मृताहादितिथयः उक्तान्ता। विप्रसंपत्तिः। शश्रद्धा
सार्वैषुणात्। दृष्टा इत्यादि ब्राह्मणसंपत्। द्रव्यसंपत्। हविष्यपयसादि द्रव्यसमृद्धिः। तिथ्या
दिपंचकं प्रतिपदादितिथयः। कृत्तिकादिनक्षत्राणि विष्टंभादियोगाः। रथ्यादिवाराः।
बवादिकरणानि चेत्यावृत्तिः। त्रिविधश्राद्धस्य कालः। प्राक्काशतिवाक्यशेषः। अत्र दश
शब्देन मन्वादियुगादिलक्षण्यायोगादिपरिग्रहः। अग्नौकरणहोमस्यासाग्नीनामाकृ
तित्रयं। दयामवच्चानग्नीनां श्रवणाग्नौहोमवर्जनात्। साग्नीनामाहिताग्नीनामग्नौक
रणहोमश्च आकृतित्रयश्चात्। अनग्नीनामनाहिताग्नीनामाकृतिद्वयामवश्यात्। तदुक्तं ११

गृह्यपरिशिष्टे दक्षिणाग्नावाहिताग्निरग्नावन्वा एवसदितवः। जुहुयादन्यमाश्वपति
तृतीयामत्रवाहुतिं। अपसदिग्नावौ। अपासनाग्नौ। अत्र अपसव्यग्निनादेवार्यपाणौ जु
हुयात्। दंनाद्यग्निम्ययथाविधि। पाणौ हुतं यदन्नं ततपृथक् ग्रश्नाति। कृत्रचिदितो। अनार्य्य
देवार्थिच्छिविप्रस्य दैवार्थच्छिविप्रस्य पाणौ अग्नौकरणहुतं जुहुयात्। तदाहमार्कं
डेयः। दैवविप्रकरे त्वायः कृत्वाग्नौकरणं द्विजः। शेषमन्ये त्रिपितृविप्रेभ्यः पिंडार्थं शेष
यत्रापयति। वायुपुराणेप्युक्तं। अहत्यासादैविके कुर्यात्। शेषं पित्र्यानिवेदयेत्। नदद्या
ताः। शेषमन्नाडं विश्वेदेवाः पुराणगरितिं कात्यायनापि। अपत्नीकास्यसदा विप्रः श्राद्ध
कुर्वीत पार्वणं। पित्र्यविप्रैरनुज्ञातो विप्रादेवस्तुतियात इति। क्रियत इति कर्तरिरूपं
अन्याग्न्यया विधिजुहुया दयमथासि नाप्याहिताग्नेदेवशात्रश्राग्निरत्र कादिश्रप्रुपा

णाद्ववज्जुहुयात्। साग्निस्तु कृष्णपक्षे दर्शे मासि मासि पार्वणेनाग्नौ जुहुयात्। कात्या
यनः दयाष्टमी सपिंडीकरणेष्वपि ब्राह्मणहस्ते जुहुयात्। तदाह कर्मप्रदीपकारः। अष्ट
कासु च वृद्धौ च मासि मासि श्राद्धपार्वणे। काम्ये मघात्रयोदश्यां मोकोद्दिष्टमथाष्टमी च
श्राद्धेषु साग्नीनामग्नौ होमो विधीयते। पित्र्यब्राह्मणहस्ते तु होमः श्राद्धे चरेषु च स्वयमपि
अन्येनाप्यत्र विप्रस्य पाणावेव परादायदिति। अत्र साग्निशब्द आहिताग्न्यनाहिताग्नि
परः। अनग्निर्वा कृताकृत्य यदाहिताग्निरपि द्विजः इति। तेषां वा कुर्वीत पाणौ कृतं यदन्नं
तत्सर्वमश्नाति किंचन तिर्किं तु प्रातरुपकल्पितेनान्नेन मिश्रयित्वाश्नाति कुर्वी
त। अपत्नीकश्राद्धे सपत्नीकसाग्निकानग्निकश्राद्धेषु। तदाह कर्मप्रकाराः। अन्नं पाणितले
दत्तं पूर्वमिश्रयुक्तधयः पितरास्तेन तृप्यंति शेषान्नेन लभंतीति। तत्र ... तालदत्तं यत्नात् ११८

डपकल्पितं। एकीभावेन तत्राशक्यं पृथक्ज्ञानेन विद्यात इति। यत्तु कात्यायनवचनं
हस्ते कृतं यदश्नीयात् ब्राह्मणा ज्ञानदुर्बलाः। न तत् भवति तत् श्राद्धं इति शातातपो ब्रवीतीति
तत्र पृथक् गशन निषेधपरं। न जीवपितृकः कुर्यात् श्राद्धं दर्शादिष्वादितं। जीवपितृकः दर्शा
दिष्वादितं श्राद्धं न कुर्यात्। आदिशब्दात् दृष्टका परपक्षमघादिग्रहण दिर्वि संक्रमणं सूर्य
ग्रहण व्यतीपात गजच्छायातिथ्यापादि पंचकाह्नरदगयादिक्षानालयाग विप्रदर्शन
पदिष्ट निमित्तश्राद्धानामुपसंग्रहः। तदाह कात्यायनः। सपिंडीकरणात् [illegible] दिकादा ४३
न विद्यात्। न जीवंतमतिक्रम्य किंचिद्दद्यादिति श्रुतिरिति। पितृकार्येषु श्राद्धेषु जीवंतं पि
तरमतिक्राम्य नयैः। उशनाः। कुर्यादहरहः श्राद्धं प्रमीतपितृको द्विजः। साग्निकोऽनग्निको
वापि तीर्थश्राद्धेऽपि विशेषत इति। तीर्थानि गयादिक्षानानि महानदीक्षानानि निरालाकी

× को...

देशपि। अमाश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च
तर्पणमिति। कातरपि। अष्टकासु च वृद्धौ च संक्रांतौ लोमवादिषु युगादिषु। चंद्रसूर्यग्रहे पाते तथ्य
कृयासु पूषश्यायागतः। जीवत्पितापि न कुर्यात् श्राद्धं काम्यं तथाखिलमिति। अत्रापवादमा
ह। पितृश्राद्धं पितृयज्ञेश्वरबुद्धो मातुर्मृतेऽहनि। विप्रसंपदि तीर्थेषु साग्निः श्राद्धं समा
चरेत्। पितृयादिदेवताप्राप्त्यर्थं ता एवात्रापि देवताः। मृताहे मातुः। शेषाः सर्वा एव प्रकी
र्तिताः। पितृश्राद्धं मातुर्मासिकेषु पितुरष्टिनामासिकेषु श्राद्धं। पितृयज्ञे पिंडपितृयज्ञे वृ
द्धौ विवाहादिनिमित्तायां मातुर्मृताहे विप्रसंपदि त्रिमघादिषु पार्वणिकैः इत्यादिषु अन्य
त्र विप्रसंनावत्तीर्थेषु महानदीस्नानेषु गयास्नानेषु तीर्थेष्वपि निषेधाभावात् तत्र
यति। साग्निर्जीवत्पितापि श्राद्धं समाचरेत् कुर्यादिति। तत्कर्मेत्यत्र पुनः परिसंख्या उत्पाद् ११९

पुत्रजननेन पितृश्राद्धं सोमिकमाख्यातीर्थे ब्राह्मणआयाते पद्महे जीवतः पितुरिति
षडात जीवत्पितृकस्य श्राद्धकाला इत्यर्थः। अत एवाह महानदीषु सर्वासु तीर्थेषु च गयासु
तु जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मवदिति। अत्र देवता आह पितृभिरिति। पितृयो
देवताः ता एवात्रापि देवताः। प्रोक्ताः पितृकर्तृकश्राद्धे या देवताः प्रोक्ताः ता एवात्र
पुत्रकर्तृके पितृश्राद्धे देवता इत्यर्थः। तदाह हारीतः। अनग्निकोपि कुर्वीत जन्मादिषु वृद्धि
कर्मणि। यस्य एव पिता दद्यात् तेभ्य एव तद्दिश्य पार्वणे इति। अमंत्रपरि न जीवत्पितृकः कु
र्यात् श्राद्धमग्निहोत्रद्विजः। येभ्य एव पिता दद्यात् तेभ्यः कुर्वीत साग्निक इति। साग्निक इत्य
नग्निकस्यापि उपलक्षणं। तत्र विशेषमाह। मृताहे इति। मृताहे मातुः मृताहे मातामहादेव
ताः प्रकीर्तिताः। मातृपितामही प्रपितामह्यो देवता इत्यर्थः। तदाह जमदग्निः। आपाद्य स

४ क्षा६

हपिंडत्वमोरासाविधिवत्सुतः कुर्वीत धर्मवत् श्राद्धं मातापित्रोः स्वयं पत्नीति । शघिपि
त्र्यादि श्राद्धकर्माणि ताएव देवताः प्रकीर्त्तिताः । मात्रादावेमात्रादि आदि श्राद्धे तत्संतानादपिता
महादीनां श्राद्धे पितामहादयस्त्रयः । मातामहस्सज्ञानामात्पितामहादयः । अयं तद
तावत्तदाद्याश्रयाद्देवता इत्यर्थः । नत्रु पित्र्यादिदेवताश्चाएवात्रापि देवताः । ऽइत्युक्ते
पित्रमत्रादायामातामहस्य पुत्रकर्तृकश्राद्धे देवतास्युः । मैवं मातृशब्दश्शर्मना
महशब्दश्च संबंधिशब्दौ तत्पुत्रसंबंधि एवमात्रादायामातामहादयश्च देवता इतिना
त्रपपत्तिः । नत्वेवं पित्र्यादिदेवताश्चाएव न स्युः । मैवं मातृमातामहशब्दान्नानेकार्थाता ए
वादेवताइत्युक्तमित्यविरोधः । इहाद्वैवयाह्निके श्राद्धे गयायामष्टकास्वपि पितामह्या
दिभिः सार्द्धं समाचरेत् । सहपत्न्यासपिंडत्वं तत्कृताद्देवजनाकार्ह पद्धावित्वासादिभिर्मि १२०

४ मात[...] श्राद्धे १

त्त श्राद्धमुदयिकमन्वाह्निकश्राद्धं गयायां श्राद्धमष्टकास्वपि पितामह्यादिभिः सार्द्धं
मातृश्राद्धं समाचरेत् । तदाह जातूकर्ण्यः । इयाहं वृद्धिर्यज्ञेकं श्रीणां नाषु पृथक्क्रिया
कि विदिष्टं तिनारीणां मन्वत्रापि मदर्थयि इति । अथान्वाष्टक्यादिषु पिंडाल्वष्टकां तस्या
वृद्धिं मातृश्राद्धं स्मृतं तदह निरेको द्दिष्टं तथा पृथक्क्रा श्रीणां नाशु पृथग्वताशातातपेनां
दिसुखदुत्कश्राद्धं गयायां च स्मृत तदहनि पितामह्यादिभिः श्राद्धं समाचरेत् । कात्यायनि
रपि अष्टका अन्वष्टक्याचगयायां स्मृतं तदहनि मातृश्राद्धं पृथक्कुर्यादिश्वन्यत्र पतिनासहेति
नत्वनवचानन पृथक्करणं विधीयते । यत्तत्पितामह्यादिनिवृत्त्यर्थं किं वामातामह्या
दिनिवृत्त्यर्थं नितावदाद्यः । अष्टकासु पितामह्या धन्वपवशात् । यत्सपिंडीकृतमिति
वचनविरोधश्चानापि द्वितीयः । मातामहस्या पत्न्यवशप्रसंगात् नापि तृतीयः । अन्य

नाप्रवृत्तिनासद्भर्तृप्रतिप्रसवविरोधात्। पृथक्करणेन द्वितीयश्चानिवृत्तिस्तस्याश्चैवप्रति
वसावानन्यार्थं। किंच भर्तृतादृशश्चान्नपिंडमृतात्मानि पितुः मातृमृतात्वाद्वावानाद्यः पितृमृ
तात्मातुः पृथक्कृतश्राद्धक्रियायां प्रमाणाभावात्। अपि द्वितीयपृथक्करणश्चाप्यवासं
भवात्। पृथक्करणेनामुमातरमेकामेवोद्दिश्य श्राद्धकरणात्। तन्न संभवति। यः स
पिंडीकृतं प्रतं पृथक्कुर्पिंडं नियोजयेत्। विधिघ्नस्तेन भवति पितृहा चोपजायते
ति वचनविरोधात्। तस्मादनुपपन्नमिदं वचनं। अन्वाध्यात्(?) नानुपपन्नमिदं वचनं। जनर्ता
मातामह्यामातामह्मन्वासापिंड्याष्टकादिषु मातुः पितुः। पितामह्यादिसहितायाः
श्राद्धमुद्दिश्य प्रतिपादनपरं वचनं। पृथक्कुर्यादित्यस्याप्ययमर्थः। पृथक्शब्दः प्रका
रांतरमाह। सपिंडीकरणश्राद्धप्रकारात्प्रकारांतरेण पितामह्यादिसापिंड्याष्टकापि १२१

ण कुर्यादिति। ननु पितामह्यादिसापिंड्यवचनमिदं यष्टिमेवं। अष्टकादिष्वपि
तन्मह्यादिसहितायामुद्दिश्ययमिति नियमार्थं। नान्यवं कश्चिन्नियमार्थं। किंचिदनुद्दि
श्यच विधिपरिमितयाष्टकादिलक्षणवाक्यान्तरेणात्। अष्टकावाक्यान्तरे विषयाभावात्।
एवं चायज्ञिन्नु मातामह्यादिनिवृत्तिः। नन्वन्यत्र पतिनाम्ह प्रतिप्रसवविरोधश्चात्। मेवं
न प्रतिप्रसवपरमिदं। किंतु पितामह्या मातामह्यादिना वसापिंड्याष्टकादि विधत्तिश्रा
श्राद्धमुस्वापति विधिपरं ज्ञानात न विरोधः। मृतादृशश्राद्धापि मातुर्मृतादपरः। नापि पृथ
करणासंभवः। पृथक्कुर्यादित्यस्य मातुः पितामह्या प्रपितामह्या नानुश्राद्ध श्यादि शाद्वि(?)
विधिपरत्वात्। तदुक्तं शातातपेन। नांदीमुखेष्टकश्राद्धे तत्रस्याद् हि कश्वान्वष्टका
सिकानाम पुपलक्षणकं। मृताह विहितत्वात्। तदाह शातातपः। मासिकनाद्धि कश्रा

द्धं मातुः कुर्यात्कृष्णपक्षमिति । गुरोरां । श्रुतानां अभिवश्रस्य मिनश्रष्टुः उत्तरश्रुमातु
लस्य । पित्र्ये नैव कुर्वीत पार्वणं । गुरुर्विद्याप्रदः शिष्यमंत्रप्रदः श्रावनस्य । कृष्णगर्भसंगृहीता
श्वश्रूभ्राता तत्सुतः ऋत्विक्शिष्यो जामातुः । मित्रस्य सहाध्ययनादिना दिनासंबंधः न श्रुत्य
तश्यापद्य । मिनीडी वितप्रश्न नादिनामक्षिपस्या प्रस्तुत अयजायां अनुजायाः सुत्रस्य
र स्यादेनः मातुलस्य मातुः । साद्दरस्य च पार्वणं । नैव कुर्वीत तदा तु सुमंत्रः । यत्र मंत्र
प्रदाता स्यात् शिष्य विद्याप्रदयज्ञकृत् । गुरुस्तान् पितृवत्कुर्वीत वा याति नैव तु पार्वणमिति । शाता
तापपितृ । अनाद्य गर्भजा । आद्याध्यापन्ना तासपिंडिनि गिद्याता । ज्ञातः सपिंडतां तस्य नैव पार्व
णमाचरेत् । इति वृद्धगार्ग्यादि मातुः सापत्नदारायस्य पितुः सहनवाचया । तायास्यने
व कुर्वीत पार्वणं पिंडनादत इति । पिंडनासपिंडनात् । वृद्धवासस्याः पि । सपिंडीकरणे । १२२

वृद्धं यत्र प्रदीयते । भ्रातृराग्निःपुत्राय स्वामिना मातुलाय च । मित्राय गुरवे श्राद्ध
मेकोद्दिष्टं न पार्वणमिति । मौंजीबंधाद्दशाहं च विसर्पां पाणिपीडनात् । पिंडनिर्वापक
रणविहीनं श्राद्धमाचरेत् । नैमित्तिकान्महालयगयाप्रत्याब्दिकादृते । मौंजीबंधउप
नयनाद्दूर्ध्वं विसराहं पिंडनिर्वापकरणं विहीनं श्राद्धमाचरेत् । पाणिपीडनाद्विवाहाद्
र्ध्वं वत्सरं पिंडनिर्वापकरणविहीनं श्राद्धमाचरेत् । एवं सर्वत्र प्रसक्तावाहेन नैमित्तिकाद्
ति । नैमित्तिकशब्देन मरणनिमित्तश्राद्धमुक्तं । महालयश्राद्धं गयाश्राद्धं प्रत्याब्दिकं
मातापित्रोः प्रत्याब्दिकं मुक्त्वा पिंडनिर्वापकरणं विहीनं श्राद्धमाचरेत् । तत्राह कात्यायि
नः । मौंजीबंधे विवाहे च वर्षार्द्धं वर्षमेव वा । पिंडांसपिंडानां दद्युः सपिंडीकरणाद्
ते इति । अत्र सपिंडीकरणशब्देन च श्राद्धं षोडशानाम् उपलक्षकः स्मृतिसंग्रहकारो

त्तिः। विवाहोपनयनादूर्ध्वं वर्षं वर्षार्धमेव वा। न कुर्यात्पिंडनिर्वपणं श्राद्धकरणं निवर्ति
तानि वा क्वं। महालयगयाश्राद्धमातापित्रोर्मृतिहनि। कृतोद्वाहोपि कुर्वीत पिंडनि
र्वपणं सुतः इति। विषुवायनसंक्रांतिमघादिषु अष्टकादिषु विवाहाय पिंडनिर्वपणं श्रा
द्धं सर्वं समाचरेत्। विषुवायास्तुलामेषायाः कर्कटमकरायाः संक्रांतिष्वयनयोस्तु
व्यतिरिक्तासु मघान्वष्टकादिषु पिंडनिर्वपणं वर्जयित्वा इतरत्सर्वांगयुक्तं श्राद्धं
कुर्यात्। तदुक्तं मत्स्यपुराणे अयनद्वितयश्राद्धं विषुवद्वितयं तथा। संक्रांतिषु च कुर्वी
त पिंडनिर्वपणादृते इति। पुलस्त्यस्मृतावपि। अयनद्वितयश्राद्धं विषुवद्वितयं तथा।
युगादिषु च कुर्वीत पिंडनिर्वपणादृते इति। देवीपुराणेपि। अन्वारोपि महती पूजा कर्त्त
व्या पितृदेवता। त्याज्यं पिंडप्रदानं तु श्वंभप्रतिविवर्जयि हिति। पितृदेवतष्टदशमवा। १२२

ओ१

अत एवमवाष्टकुर्वंतः श्राद्धं ग्रहीष्यपुत्रा नवनसातीति। यत्तु षट्त्रिंशन्मतं वचनं तत्पिं
डप्रदाननिषेधपरं। एवं अशक्त्या पार्वणं यथावत्कर्तुमक्षमः पिंडाद्यादिविहीनं संकल्प
श्राद्धमाचरेत्। यथाद्यादिनिमित्तेषु अशक्त्या पार्वणं श्राद्धममावास्यादिषु यथावत्सर्वांग
युक्तं कर्तुमक्षमः पिंडप्रदानाद्यादिविहीनं संकल्पश्राद्धमाचरेत्। आदिशब्दादावा
हनाग्नौकरणार्घ्यावदानानां परिग्रहः। तदुक्तं स्मृतिसंग्रहे। अंगानि पित्र्ययज्ञस्य य
दा कर्तुं न शक्नुयात्। संकल्पश्राद्धमासो कुर्यादर्घ्यादिवर्जितमिति। आपस्तंबोपि। सं धि
कल्पश्राद्धं यदि विधानाग्नौकरणपिंडार्घ्यावदानानि वर्जयेदिति। दाहादिमंत्रवर्जि
ॐ तं विदध्यादिरससंस्कृतान्नदानादि अपुत्रश्चेत्प्राप्तोतः पुत्रिकासुतः। दत्तकः क्री
तः कृत्रिमो दत्त एव च। अपविद्धश्च पत्नीजश्च रूढजः कथ्यकासुतः पौनर्भवः सहोढो वा या

नं दत्तश्च कृतीलता ॥ दौहित्रोपन दारीच त्रानातत्पुत्र एवच ॥ पितामाताशुश्रूषा रेवश्च सात
पुत्र एव चा ॥ स पिंडः ॥ सोदरकामाउः सपिंडश्च सोदादकः ॥ स्त्री चिशिष्यार्लिमा चार्यासि माता
सश्चा ॥ पितृ ज ल्सं न त्वं धरिक्थान कारायस्व नीपतिः ॥ औरसः सुतपिता मातापित्रो ॥ द्या
हाद्योर्ध्वदैहिकं ॥ मंत्र वित् पिटमध्यक्रमं त्रवत्नु विदद्युश्च कुर्यति ॥ तदाद्युमंत्र ॥ माता
पित्रोश्च कर्वीत स्तन यारोरसः सुतः ॥ पौत्रमक्षिकसंस्मृतिसंग्रहात् पुत्रः पौत्रश्च तत्पुत्रः
पुत्रिकापुत्र एवा रतिबृहस्पतिना पुत्रकं पौत्र श्च पुत्रिका पुत्र श्चर्य प्राह्निक राष्ट्रानारिक्ष
च पिंड दान वसामोमातोप रिकी र्तिताविति ॥ न च यं पौत्र पुत्रिका पुत्र यो श्राद्ध विकल्प
श्च तामेवं ॥ पुत्रः पौत्रश्च तत्पुत्रः पुत्रिका पुत्र एवा च तिपौत्रिका भाव पुत्रिका पुत्रस्य विधा
नात् पुत्रेषु श्च पुत्रेषु जातं वा कोदरय त्सादति कृष्ण श्रृंगवद् दत्ता चन विकल्पः ॥ पुत्रि १२४

का सुत इत्यत्र पुत्रिकायाः सुतः पुत्रिके व सुत इति द्विधा विग्रहः ॥ तदाह वशिष्ठः ॥ अ
भ्रातृका प्रदास्यामि पित्रे कन्यामलंकृतां ॥ तस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥ द्वि
तीयः पुत्रिको भवति पुत्रिका पुत्रा भाव द्विजनजः पुत्र जर्हनस्य क्षेत्रायां देव रण सपिंडेन
त्वोत्पादितः ॥ क्षेत्रजः तद भावे दत्तकः ॥ माता पिता वा याभ्यां वा दत्ता दत्तकः तदभावे क्रीतः
पित्रामात्रा वा याभ्यां वा क्रीतः ॥ क्रीतः तदभावे कृत्रिमः ॥ पुत्रा सदृशा नाम धन दानादि प्रलो
भनैः पुत्रीकृतः कृत्रिमः ॥ तदभावे दत्तमाता पित्रा विहीनस्त्याभ्यां परित्यक्तो वा तवाहं पु
त्रो भविष्यामीति आत्मानं यो ददाति सदत्तः ॥ तदभाव अपविद्धः माता पितृभ्यां
उत्सृष्टो यो नस्य गृहीतः ॥ गृहीतः ॥ पौत्र अपविद्धश्च ॥ तदभावे पत्नी ॥ य ज्ञादिधर्म निर्दाहि का रि
णी पत्नी ॥ तदक्तं स्मृति संग्रहादौ कानीन गूढस सहोड पुनर्भूतिनयोः शम्यो पत्न्यभावे

कर्त्तृत्वमशक्तावन्येनापीति शंतिः। गृह्यजश्च सदृशश्चेति विग्रहस्य तु पितृन कर्त्तव्या पिंडदा
नोदकक्रिया। पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदर इति शंखवचनं तदा रसाद्याद
विद्युपर्यंत पुत्राभावविषयं। तदभावे गृह्यजः मातृभ्रातृपुत्रश्च तत्स्थानापन्नो गृह्यजः। तदभा
वे कन्यासुतः पिण्डदः शमनिकन्यायां रहस्यतत्र दौहित्रः कातीनः। तदभावे पौनर्भवः विधवा
पुत्रः तदभावे सहोढजः। गर्भस्थैव गर्भिण्यां परिणीतायां परिणीतः सहोढजः। तदा
हुयाज्ञवल्क्यः। पिंडदोंशहरश्चैषां पूर्वाभावे परः परः इति। नच ननु वचनान्न द्वादश
पुत्राणामेव परः परः इति उपयुक्तं। तत्पौत्रप्रपौत्रपत्नीनां तत्र विबाधितं शास्त्रमेवं नात्र
पौत्रप्रपौत्रपत्न्यां तत्र विधि पूर्वस्य स्वविभक्तापेति परस्यापि परत्वं नापेति। यद्वि परं स्य
वक्षान मात्रं तद्वचनंतिराधिकाराक्षेन रहस्यं कार्यमिदं तदुक्तं। तद्वहित्वा निसंबंधं कर्तृ १२५

व विषयं। सन्नहवि हीन विषयं वा अतएव वृद्धयाज्ञवल्क्यः। यदि म्रियेत अन्न क्रियते सपिंडी
करणं विना। गयायां तु विशेषेण आयान्यान्यपि समाचरेत् तु क्रियतां माता पितरा वि
यर्षः। तदभावे ज्येष्ठः। अनुजो वा अग्रजो। तदभावे सुतः। सोदरस्य पुत्राभावे आसोदरस्य
सादि विधानदभावे तत्सुतः। तदाह कात्यायनः। अनुजो वा अग्रजो वा पित्राउः कुर्वी
त संक्रियां। ततश्च सोदरात् तद्बुक्रामेणतनायाचार्यायामिति। तदभावे सपिंडः तदभा
वे सोदकः तदभावे मातुः सपिंडः। तदभावे मातुः सोदकः। मातुः सपिंडा माता
महस्तसुतादि माता मह संतताववपंच मपुर्षान् स्त्रीपुरुषपर्यंता मातुः समानो
दकः तदभावे शिष्यः अनुपात्नेयं वस्त्री अतः पृथक् ऋषिः। एवं ब्राह्मणादिषु न विवा
हयपत्नी आताथर्षः। तदाह शातातपः। धर्मेविंनोढया या ः सा पत्नी परिकीर्तिता।

सहाधिकारिणी ह्येषा यज्ञादौ धर्मकर्मणि । कश्यपोक्तानुयानारीं नशापत्नीति
धीयतां न सा दोषवान् पितृश्राद्धादासीतां हुन न्यायाद्विडरिति । तद्वचनादेशिष्टा तद्वचना
दुरूथिकृत तद्वचनाद् आचार्यैः । तद्वचनात् जामाता दुहितुः पतिः । तद्वचनाव सखा तदुक्तं
मार्कंडेयपुराणे सश्वशुरान् तद्वांधवांश्च सखा पितृश्वशुरश्च जामाता स्वहतः कु
र्याद्विश्वेलंपेटाधिकं । तद्वचनादेव निष्प्रतिः उ संनबंधान्मृतस्य रिक्थं च यः कांव
त्सुषुप्सितजातीयं प्रेष्यवादव निपतिः श्राद्धं कारायतां । तदुक्तं स्मृतिसंग्रहे पुत्रापा
३ त्रः त्रयं न तत्पुत्रः त्रिकाःपुत्र एवच पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा भगिनी
भागिनेयश्च सपिंडः स्यादेकः स्मृताः असंनिधाने पूर्वेषामुत्तरः पिंडदाः स्मृताः विष्णु
पुराणे उक्तं पुत्रः पौत्रः प्रपौत्रश्च तद्वद्भ्रातृसंततिः सपिंडीसंततिर्वापि क्रियाला १२६

तस्यापकर्षश्चाद्दितिनं नसर्वानावपरः पिंडदस्यकार्कादेवायोगात् पुत्रादावसंनिहि
तपौत्रादिनिहादिकं न क्रियतिः उत्तरं अत्रानावशाद्वानाशवचनः किंतुसंनिधा
नवचनः असंनिधानेवाद्दशांतरस्थित्यानाशादोषतएव सगोत्रः सगोत्रावायवि
त्रीयदिवापुमान् प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति यद्वचनं तदप्युपपन्नं
यदिनाशवचनश्चान्ताः प्रथमेहनि क्रियाभिदानास एव सपिंडीकरणं तत्प्रयोगकात्
त्तिदशाहं तत्समाप्तिवचनं नच्छात् तन्नामादेनावशक्तः असंनिधाने वचनान्न पुत्रायसं
निधाने पौत्रादीनां कर्तृत्वमुपपन्नं नतु नावशक्तः पिंडदानपात्रे असंनिधानपरः अ
संहरणपक्तिनाशपरः तत्कथं सकृदुज्ज्वरितत्वाकपरत्वं उत्तरं अत्र पिंडदानमंशहरणं
धियविध्येयं तेनाहत्याशुद्वयपरत्वमित्यविरोधः तद्वचनावस्मृतिकौ मातामहश्च पुत्र

त्वेन स्त्रीत्वतः। पत्नी उदितर इति कात्यायनवानहारीतोदितेः। तदुक्तं स्मृतिसंग्रहे कार
णात्तु सा हि दत्ता भ्राता कुर्याद्भावादिनश्यतः। ततस्तु सा दत्ता भ्राता तदभावे च तत्सुतः इ
ति। तदभावे पिता तदभावे माता। ननु न च माता न च पिता कुर्यात्तु नष्टापत्यकं। नाग्र
जस्तत्र भ्राता भ्रातॄणां तु कनीयसामिति। कात्यायनेन नाक्तं तत्कथं तत्र कथं स्यात् पुत्रादे
तदधिकारिणि पि सत्यपि ततु असत्यधिकारिणि पित्रादिनिरपरिकल्प्यमव। तदुक्तं स्मृति
संग्रहे। असन्न बांधवं प्रेतं पिता भ्राता तथाग्रजः। जननी वापि संकुर्यान्महादाना
यथाक्रमं। यत्तु कात्यायनेनः अपुत्रायाः पतिर्दद्यात् सपुत्राया न कुत्रचित्। न पुत्रस्य
पिता दद्यात् नानुजस्य तथाग्रजः। यत्तु बौधायनवचनं पित्रा श्राद्धं न कर्तव्यं पुत्राणां
न कथंचनं। भ्राता चैव न कर्तव्यं भ्रातॄणां च कनीयसा। इति। तदधिकारिभ्रात्रादिसत्त्वा १२७

नी१

वृ पजायत। तत्र भार्यावसार्द्धवर्षासमानोदकसंततिः। मातृपक्षश्चापि पिंडनः सबं सं१०
धायाजननवा कुलद्वयपितामाता स्त्रीणिः कार्याः क्रिया नृप। तत्संघातयति
वापि कार्याः प्रेतस्य संस्क्रियाः। मार्कण्डेयपुराणेपि स श्वशुरुसन्न बांधवस्य वा
पि श्वशुरश्चैव जामाता मातुलस्तः कुर्याद्दक्षिणांपेष्टामधिकं। सवर्णाभावे तु पतिः क
रायत्तस्य रिक्थकताः। तज्जातीयनरः सख्युपहायाः सकलाः क्रियाः। सार्द्धवर्षामवर्ण
ना बांधवा न पतिर्यति इति। स्कंदपुराणेपि सवर्णाभावस्त्रियः कुर्युश्च नर्हलामम्भे
नकं। पितारक्षत्पनीता पि विर्द्दिशादारसंस्कृतः। अक्षदिदलिकमाप्यसंस्कृताः श्राद्धे
कारिणः। अरस्तः स्तुत अनुपनीता पितामाता पिता साक्षीदिदिकं कुर्याः। ततादम
वनन ग्रस्मिनु प्रच्छातकमा कोपि हालमोडिवंधनात्तु ना नासिश्चाता रायश्च मत्वाक्षनि

नयनादृत इति । शुक्लाधानिनयनं प्रेतकर्म शुद्धं मंत्रैरपि नाग्निर्ग्राह्यः । आयत्नुपात्
न्मौंजीनिबंधनात् । मंत्राः । न तु उपनीतोपनीतामहादेवकएवयइति । आशौच उपाकृतजा
ग्राः । पुत्र आहिताग्नेरग्न्यादयश्च संस्कृता उपनीताः । अन्ये अनुपनीता आशौचं विकल्पिणः
शुद्धाः । तत्र हारीतः । मन्त्रैः कर्म तु कुर्वीत यावन्मौंजीनिबंधनात् । तदर्धं मंत्रसूत
कर्मस्वपि क्षिकार्यसावित्री तानुजातमात्रापि कुर्यात् तद्दीत्यन्ताहालिकादाद्या
ह्निकादर्वीकृकुर्यात् । होमधिकं प्रथमवार्षिकि चूडाकरणात् पूर्वं पिद्धामधिकं न
कुर्यात् । तथा हारीतः । मंत्रः । पुत्रः प्रेतानंतर्हिमात्रेण संस्कुर्यात् । हिन । मातरं नहाता पितरं नाह्रि
काद्बालोऽत्र होमाधनकर्मणा । नहासा मंत्रेण कुर्यात्तु शक्त्यार्थं कस्य हारीतः तृतीय
वर्षादूर्ध्वं मंत्रवत्समाचरेत् । सोऽनुपनीतः तृतीयवर्षादूर्ध्वं होमधिकं कर्मं १२८

त्रवन्मंत्रमुक्तमाचरेत् । तृतीयवर्षादूर्ध्वं तृतीयवर्षे विप्रलद्भत्कं । तथा हारीत
मंत्रः अनुपातापि कुर्वीत मंत्रवद्धोमधिकं व्यहासो कृतचूडश्चात्र विवसर इ
ति । नह्यग्निक्रियतां इति यन्मनुवचनं तद्धयं तृतीयवर्षकृतचूडविषयं यत्तु कुर्या
दनुपनीतापि श्राद्धमाकाषियः सुतः । पित्र्यदाकृतिशाखोक्तं कुर्यान्मंत्रवर्जितमि
ति । तदपि तृतीयवर्षकृततं चूडविषयं कृतचूडस्तु कुर्वीत उदकं पिंडमेव च । स्वधाकारं
प्रयुंजीत वेदोच्चारं न कारयेत् । इति याज्ञवचनं यत्तु कृतचूडानुपतस्तु पित्राश्रा
द्धं समाचरेत् । उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसौ । इति स्मृतिसंग्रहकारव
चनांतद्वयं पंचमवर्षकृतचूडविषयं नत्वनुपनीतकृतसर्वेवकुर्यात् इतकादश
वर्षात्तु अमंत्रतत्त्वपनीत यथाविधि वेदमंत्रवत् । अनुपनीतः पत्नी च यथाविधि सपं

त्र्वतु । प्रत्युपनीतः पत्नी चयथा कर्म मंत्रवत्कुर्यादिति विहितं तत्रादेव मंत्रवत्कुर्यात् । असंस्कृतो
न पन्न्याव श्रुमिदानं समंत्रकं कर्तव्यमितरत्सर्वं कारयेदथामवदीति । मनुरपि । पिर यज्ञौ
कृतिं पाणौ कुर्यान्मंत्रसर्वकं । अंद्रपुराणे प्युक्तं । यात्कुशमंत्रवत्कर्मपत्नीकुर्याद्यथावि
क्षित तदौर्ध्वदेहिकसाहिमंत्राहधिर्मसंस्कृतो तातितियत्तुसर्वाणि तानिमत्रवतदत्तः कुर्युः अनन्नतणाम
मंत्रकांतदथस्यादिप्रेतादिविधिर्वाहाठस्त्रीविषयं । नन्वनुपनीतः कथं कुर्यादुपनयनवतनंग
प्रसंगादिथत्राह । मातापित्रारुपाध्यायाचार्यायाणोर्ध्वदेहिकं कुर्वन्मातामहस्यापि
व्रतीनत्रस्थातव्रतातु । मंत्रात्मकस्य ब्राह्मणात्मकस्य वावादेकादशस्य प्रवदांगानां वाध्या
पयिता उपाध्यायः । उपनयनमात्रं कृत्वा सांगवेदाध्यापयिता आचार्यः । मात्रादीनामौ
र्ध्वदेहिकं कुर्वन्नपीत्युपनीतः व्रता तु उपनयननिमित्तान्धचयादि व्रतानि तत्रस्थातन १२९

क्रियां शत्त्वाब्याब्युः स्यान्नष्टवान्निति वत्तौ । प्रत्याज्ञजवतितदाह याज्ञवल्क्यः । आचार्य
पित्रुपाध्यायान्निर्हृत्यापि व्रती व्रतीतिवसिष्ठोपि । ब्रह्मचारिणः पितृकर्मणा व्रता
निवृत्तिरस्त्यत्र मातापित्रोरिति । तत्र विष्णुपुराणे प्युक्तं । यथावतकुर्यात्पिस्तुतः पितृकु
यतिप्रियाहत्पः । तदाद्यामातामहस्याद्यौहित्रापितत्र्याहतीति । अत्रादौहित्रशब्देन पुत्र
सुतो विवक्षितः । ननु पुत्रपत्नीप्राप्ते तत्पुत्रमातापितृसंपिंडसोदकाद्येव निपद्यंतो
र्ध्वदेहिकं कुर्युरित्युक्तं । अत्र ध्याहाय हरः । सकुर्यान्नाद्यः । तदाह याज्ञवल्क्यः । पिंड
दोंशहरश्चैषां पूर्वाभावपरः परः । विष्णुपल्लोबोचयथा वंहरः सपिंडदायीति । ननु
पित्राभावकथं उत्तरं । तयाभावपि पुत्रपत्नी प्राप्टेन तत्पुत्र शिष्य मातृपितृभिरवश्यं श्रा
द्धं कर्तव्यं । तदुक्तं मार्कंडेयपुराणे प्रता त्रातान्वतत्पुत्रः पत्नी माता पिता अथवा । विनाभाव

पिशिष्ट्याकुर्वतानश्चैदादिकमिति। विज्ञानेश्वरोऽपि अपुत्रः पितृवित्तानामेव पिंडदश्चेति
पुत्रग्रहणं द्वादशपुत्राणामुपलक्षणमिति। भ्रातृग्रहणं सोदरासोदरोपलक्षणं तत्पुत्रग्र
हणमप्युक्तयातोपलक्षणं। नत्वनुज्ञातानामकृतानामकथं तत्पुत्राणामपि वक्तृत्वासाद
तातनत्पुत्रेण पुत्रिणामनुरब्रवीदिति। भ्रातृपुत्रस्य पुत्रयत्नमुक्तं भ्राता द्वादशविधपु
त्राभावे धनहारी। दौहित्रस्य भ्रातुश्च पिंडदानेन कर्तव्यकथनमयुक्तं। मैवं। अपुत्रो
भ्रातृपुत्रसंततावेतामेव पुत्रीकुर्यान्नान्यामिति मनुवचनं सार्थः। अन्यथा सापत्नीपुत्रादित
रइति। न्यायस्याश्रयमर्थं संगतं। अपुत्रायां सपत्नीजः क्षेत्रजाद्याः पतिः स्वधाप्रदस्त्वे
नावपरः कुर्यादिविधिवात्त्वेकादशमयिकं। अपुत्राया औरसः क्षेत्रजः पुत्ररहितायाः सपत्नीपु
त्रक्षेत्रजाद्या एकादशपुत्राः पतिश्चान्यातत्पुत्रस्तदभावे परः परः। विधिवत्विहितमासमासकं १२०

मंत्र्यादिविधिवात्त्वेकादशमधिकं कुर्यादिति। अत्र सोदरत्वजः शब्दः पत्नीक्षेत्रजाद्युपायः। तदा
हमनुः। बह्वीनामेकपत्नीनामेकाचेत्पुत्रिणी भवेत्। सर्वास्ता तेन पुत्रेण प्राह पुत्रव
तीर्मनुरिति। कात्यायनोऽपि विदध्यादौरसाक्षेत्रजाज्जनन्याअगृहीदादिकं। तदभावे सपत्नी
जः क्षेत्रजाद्यास्तत्याहृतः। तत्पामनामावेऽपत्नीस्तदभावे सपिंडका इति। तया भ्रातृतादि
तदभावे परइति प्रकारेण। क्षेत्रजाः क्षेत्रजः। अपापि क्षेत्रजः शब्दः सपत्नीक्षेत्रजः परः।
इषुपुत्रादिषु किं कर्म किं न कर्तव्यमित्यत्राह। दशाहादशाहपर्यंताः सापिंडां नाद्दशाहा
तः। तदूर्ध्वं श्रेष्ठकर्मीत्युच्चं मध्यमाश्चानराः स्मृता। पुत्रैश्च भ्रातृतत्पुत्रैः पत्याशश्चापि च्छेदापि
ताः। क्रियाकार्यं समादिष्टा शोषः पूर्वविधि मध्यमाः। बंधुदायश्चादत्तक्षेः कर्तव्यौपराधि
स्मृताः। अथश्चायदत्तापुत्रीकृतापि दौहित्रःप्रतः। पितामहस्यादिविधिवत्कुर्यादिति।

त्तरक्रिया ॥ दाहादारभ्य दशाहपर्यंताः क्रियाः दशाहादूर्ध्वं सपिंडांताः क्रियाः तदूर्ध्वं
सपिंडीकरणादूर्ध्वं क्रमात्पूर्वा मध्यमोत्तमाः प्रोक्ताः ॥ तत्र पुत्रः प्रतिदिनं पुत्रेण
ऽपुत्रैः पत्न्या शिष्येण वाखिलाः पूर्वमध्यमोत्तराः क्रियाः कार्याः समादिष्टा उक्ताः ॥ प
त्नीग्रहणं स्त्रियो ऽप्यनुपलक्षणं ॥ तदुक्तं स्मृतिसंग्रहे ॥ सवर्णा वा स्त्रियः कुर्युः अन्नहीना
ममंत्रकं ॥ श्राद्धं दैहिकं कथ्यादि दशाहादीनि यथाविधीति ॥ शास्त्रः पितामहः सखायं ते
पूर्वमध्यमाख्याः क्रियाः ॥ कार्याः दाहादिपिंडक्रियाः पर्यासिद्धाना धिकं वक्रधनग्रहणे
त्तर पितृपितादिनैरुत्तराक्रियाः कर्तव्या स्मृताः ॥ तदुक्तं छंदोगपरिशिष्टे मलमासवन्मता
श्वाणां द्रविणं यश्च कीर्तितः ॥ तत्र पुन्मलमासादत्त ऽविधिशिष्टा निमाम पिं रूपिस्तिस्य
निर्दिष्टा निकृतिः पावनी परा ॥ श्राद्धरूप तनात्मस्य कुर्यादिति ॥ डादक क्रियामिति ॥ श्रद्धा १२१

यदा तु पितृपुत्रीणां तात पिंडदत्वं सुतधर्मांतां मध्यमोत्तरक्रिया विधिविद्र्युरिति ॥ तदा
ह पराशरः ॥ पूर्वाः क्रियाः मध्यमाश्च तथा चैवोत्तरं संक्रिया त्रिप्रकाराः क्रिया ह्येतास्ता
सां भेदं शृणुष्व मे ॥ अक्षाप्य दशाहानां मध्ये याः क्रिया दाहादिकाः स्मृताः ॥ ताः पूर्वा म
ध्यमा मासि मासि या ओका द्विष्टसंज्ञिता ॥ प्रातः पितृत्वमापन्ने सपिंडीकरणादनु क्रियंते
याः क्रिया पित्र्यास्ताः प्रोच्यंते ता उत्तराः ॥ पितृमातृसपिंडैस्तु समानसलिलैस्तथा ॥ त
तः सातगातेश्च पिराज्ञा वा धनहारिणा सिद्धादयः क्रियाः कार्याः पुत्राद्यैरेव मा
तरा ॥ द्वादशाहिकं वनिरस्त्रैश्च कार्याश्चिन्नयाप्यति ॥ मन्वहा ॥ विप्रादिकैः सार्ववर्णैर्लिं
गो ऽप्यौर्ध्वदैहिकं कर्तव्यं निर्विवादेन श्रद्धया ननतत्स्वरा ॥ विप्रादिकेः सार्वब्राह्मणैर्वा
क्षत्रियवैश्यशूद्रैर्वर्णसमानलिंगिनां चान्यत्सह तहद्यार्द्दनियदौर्ध्वदैहिकं कर्तव्यं वत्स ब्र

क्षणादयः॥ लिंगिना ब्रह्मचारिणा यथाश्रमिणः। एतत्सर्वं जिपाद्यमिष्याद्धनेनेति विप्र
ण शूद्रश्राद्धं नैव कर्तव्यं आन शूद्रेण तच्छ्राद्धं विप्रश्राद्धं नैव कर्तव्यं। विप्रपदं क्षत्रियाद्युप
लक्षणं। शूद्रपदं वैश्याद्युपलक्षणं। तदाह मरीचिः विप्रादिश्राद्धं स्वयमेव च यः कुर्यादौर्ध्व
देहिकं। तद्दक्षिणमासाद्य यमी नरकं त्रापि ब्राह्मणे। तिष्ठ हालोकपरत्रावचति। पारस्करोपि
न ब्राह्मणेन कर्तव्यं शूद्रश्राद्धं कदाचित्। और्ध्वदेहिकं शूद्रेण ब्राह्मणश्राद्धमपि पारशवेनिकर्ति
तु। पारशवं दाह कर्तादिपित्रप्रत्याब्दिकं विना। यन्नु दर्शादिकालविषयाः पितॄणा। मीत्र
त्रापि ब्राह्मण शूद्र शश्वद्वित्तरवासेपि लक्ष्मीको। पितॄणां यत्र दर्शादौ विहितं श्राद्धम
त्र। मातामहानां दौहित्रमातृवर्णात्प्रत्यहं तु ततः अवश्यमेव कर्तव्यं अकृताद्वैज
सः श्रुता। सापिंड्यं तं च दहातिएनसः श्रुतश्राद्धं त्वद्यादिश्रायाये वाच्छ्रामत्वतिपद्दर्ध्यां १२८

क्तिः तदाह स्मृत्यर्थसंग्रहः। पिता यायत् न पुत्रश्च प्राप्त। तत्र मातामहाद्भुवं अविशेषेण कर्तव्यं वि
शेषात्रत्रकं ब्राजदिति। यथा सापि। पितृन्मातामहांश्चैव द्विजः श्राद्धेन तर्पयन्। अनृण
स्यात् पितॄणां तु ब्रह्मलोकं सगच्छतीति। कुंदहृताणपुत्रकं। पार्वणं तु कृतयस्तु कव
लं पिण्डदस्तु ततः मातामहानां कुरु तत्पिण्डदाय सम्भजायत इति। आवाशौचप्रसक्तावृ
पवादमाह। दाहादिसापिंड्यान्तकर्म पितुः प्रत्याब्दिकं तु श्राद्धं यत्र कर्तव्यं तदाह कात्या
यनः। कर्तृत्वसमन्वितं स्वकृतं तथा श्राद्धं चाषोडशं। प्रत्याब्दिकं च शौचाशुचि पिंडास्तु षडि
तिसृ तिरिति। कर्तृत्वसमन्वितं श्राद्धं स पिंडीकरण श्राद्धं दौहित्रमात्रोगेण यस्य। मा
तृग्रहणात् पुत्रीकरणधनहरणयोर्निवृत्तिः पुत्रीकृतनधनेन हायिणा वा दौहित्र
ण दाहादि पूर्वमौर्ध्वदेहिकं सपिंडीकरणान्तमुत्तरं च दशादिश्राद्धे। कर्तव्यं नतूत्तरं दश

दिश्राद्धमावति। तदुक्तं छंदसराणे। श्राद्धं मातामहानां तु अवश्यं धनहारिणा। दौहि-
त्रेणार्थनिष्क्रयार्थं कर्तव्यं स्वर्वत्सरामिति। पूर्ववद्दाहादिकं सपिंडीकरणांतं मृत्सरं दर्शा-
दिकं नु कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः। उभयोरपि संबंधकुयसि उभ-
योरपीत्यत्र वचनात्पुत्रिकासुतो नियमान्मातामहश्राद्धं कुर्यात्। इति नियम विधे-
नाद्धपुत्रीकृतादौहित्रेणैतत्कर्तव्यमिति वक्तुमयुक्तं। उक्तं वचनार्थपरिज्ञानाभा-
वात्। पराभूतात्। वचनस्यायमर्थः। द्विविधो हि पुत्रिकापुत्रः। मातामहादानेव संबंधः
पितृमातामहाभ्यां संबंधश्च मरणमातृनेव संबंधायथा वसिष्ठः। तिं वक्तुमयुक्तं उ-
क्तं वचनार्थपरिज्ञानमेवात्रापरौ अत्राहकौ प्रदास्यामि तुभ्यं कन्यामलंकृतां।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति। उभयसंबंधो यथा कात्यायनः। सु- १२२

त्वाहं प्रदास्यामि तुभ्यं कन्यामनवानपि पुत्रार्थीविदिहानपत्ये: सा नो पुत्रो भवेदिति।
तत्र मातामहादानेव संबंधो मातामहश्राद्धं नियमात्कुर्यात्। मातामहश्राद्धमेव नियु-
मेन कुर्यात्। न पितृश्राद्धं। तस्मिन्कृते तत्र यौक्रदयः अकृते प्रत्यवायाभावाच्च। उभयसं-
बंधउभयोरपि नियमेन कुर्यात्। यद्वा धनहारौदौहित्रः स च पितृमातामहयोर्श्राद्धवा-
हाद्धिसपिंडांतं उत्तरं दर्शादिश्राद्धं च कुर्यात्। तदुक्तं मनुना मातादौहित्र एवाखिलं
रिक्थमपुत्रस्य पितुर्हरेत्। स एव दद्याद्द्वौ पिंडौ पित्रे मातामहाय च। अपुत्रस्यापि
तमत्रि: पितृरिक्थभाक्। पुत्रिकापुत्र श्राद्धक्रममाह भारतः पितृत्पितृद्द्विदश्राद्धं स-
मावपेत्। तत्पितामहात्पितात् त्पिता मातामहः पिता। मातामहस्तत्पितातत्पितातात्वथाद्दि-
श्यायवेत्तिविधिरयं। तथाह मनुः। मनु:प्रथमत: पिंडं निर्वपेत्पुत्रिकासुतः। द्वितीयं तु पि-

ऽसंशयात्तृतीयं तुः पितुः पितुरिति। अपरा मातामहेन पित्रा च संबंधा पित्रास्युद्दिश्यं पि
तृपितामहप्रपितामहा उद्दिश्यं मातृतत्पितृतत्पितॄनुद्दिश्यं च समाचारतः। चकारान्मा
तामहानुद्दिश्य श्राद्धसमुच्चयः। पित्रादयस्त्रय उद्दिश्या यावत्तिग्रहः। तत्त्रयसंबंधाश्च वर्ग
द्वयस्य श्राद्धं कुर्यात्। मातामहश्राद्धपूर्वकं स्वधर्मः। तदा दत्तकस्य श्राद्धं गतः। यस्तु तत्र य
संबंधपुत्रिकायाः सुतात्मजः सो पूर्वं मातामहश्राद्धं पश्चात्परं क्रमात् स्वरतः॥ ॥ क्षेत्र
ज श्राद्धमाह। क्षेत्रजः सुतः कुर्यात्। दत्तादिकृत्रिमाणां खिलं। बीजिनश्च नाम सुतसंज्ञात
त्कृत्रिमादिकं। कृत्रिमाणां बीजिनश्चापि बीजिनश्च प्रमीतमहानीनदिजनयाप्रतीयाः
कृत्रिमपूर्वकं च नियोगतः। विधिवायार्थसुतायाः याय कुर्यात् बीजिनः क्रियां कृत्रिमे
ण च शुल्कमात्रमातामहदत्तश्चानदि। क्षेत्रजः सुतः कृत्रिमः पितुर्दत्तिदायवित्तं कुर्यात्। १२४

त्र खिलश्राद्धं न दायाददिश पिंडीकरणात्तं दशाद्युत्तरं च श्राद्धं समुच्चयात्। बीजिनश्चापि
तुः कुर्यादिति बीजिनश्चयत्ति दरिक्थ। पुत्रानश्यात् श्राद्धसएव कुर्यान्न्यायं। कृत्रिम
सुता। अमादिकमावास्यादिकं श्राद्धं कृत्रिमाणां बीजिनं चापि कुर्यात्। बीजिनश्च सु
ता कृत्रिमौ जीवति बीजिनान्न कुर्यात्। उत्पन्नायाः कृत्रीजिविनाः सुतयोः कृत्रिमपू
र्वकं कुर्यात्। अनियोगतः पत्युरनुज्ञां विधिना विधवायामयमुत्पन्नाः सुताः कृत्रिमाः
क्रियां नैव कुर्युः। किंतु बीजिन एव कुर्युः। यदि माता शुल्कं दत्त्वा बीजिनः प्राप्ता स्यात्
अथवा शुल्कं विना प्राप्ता स्यात् तदा बीजिन क्रियां मकुर्युः। तदा दत्तार्दवलयापाद्या
सुख्यायणकाहत्थु द्विंशां पिंडादक क्रियां। द्वाशांदद्यात्तु षड्विंशं एवं कुर्यात्रिसुत्र
तीति। द्वांशां पितृवर्गाय्यां नवविंडादानं श्राद्धादिकं कत्ताद्वि दिवसेन। द्वांशां दद्यात्त्रय

पिंडा एवं कुर्वन्न मुह्यतीति। यद्वृद्धकाश्यपवचनं। तद्दृशक विषयं। मरीचिरपि सगो-
त्रा वाथ गोत्रा वा नावाय द्विधा वा सुतः। पिंडश्राद्धविधानं वा कुर्यात्त्रिगोणप्राग्निर्वपेत्।
बीजिनश्च ततः पश्चाद्भावतांयत्क्रमान्मृतौ। बीजकर्त्तरि उपरतो क्षेत्री जीवति तार-
कं चिंता। बीजिनं दद्यात्पादौ उन्मृतौ तपश्चात्प्रदीयत इति। बीजिनश्राद्धादाहादिकं
सपिंडांतमाह्निकं दद्यात्। नामावाश्राद्धादिकं। क्षेत्रिणि मृते तपश्चात्क्षेत्रिस्वधिकं ममावा-
स्यादिकं प्रदीयत इति। एवाह उशनो यदि मृतौ स्यातां बीजिक्षेत्रपादौ दद्याद्दिः। क्षेत्रि-
ण्यादौ न दद्यात्तं च बीजिना नापतनपुत इति। मरीचिरपि। बीजिनाय दि पुत्रान्नाप्यानज-
वाक्षेत्रजः सुतः। क्षेत्रिं वा बीजिनश्चापि सर्वश्राद्धं समाचरेत्। नारदोपि। उद्भातनाय-
त्रनिजक्षेत्राया एकेनबंधुनापिह्यणः। अरिक्थ माजोश्रसार्द्धं बीजिवा भवतः सुताः। द- १२५

काह्व बीजिनपिंडमाता। व्युत्क्रमान्नाशतो। व्युत्क्रोपनतायां उ पिंडानादद्यकार-
वात्। गोत्रविशेषप्रश्नश्च [illegible] गेनात्क्रें। स्त्रीणां माद्य श्राद्धादो नर्ज्जः। यत्क्रांतं तन निर्व-
पेत्। यदि स्युस्तत्पुत्रा निशाप्रतिपत्तिम [illegible] समाश्रिता। ताजात्रणं तदादयं पिंडं श्राद्धं
तथोदकमिति। पत्नी [illegible] हृत्तादीनां सपिंडानां यदि क्रमात् संघातमरणं तत्र तत्क्र-
माच्छ्राद्धमाचरेत्। बहूनां [illegible] एकस्मिन् दिनमरणं संघातमरणं प्रत्यादीनां क्रमा-
संघातमरणं यदि स्यात्। तत्र तत्क्रमान्मरणक्रमात् श्राद्धं कुर्यादिति तदा [illegible] क्वा-
पूर्वमृतस्याद्यादौ द्वितीयस्य ततः पुनः तृतीयस्य ततः कुर्यात् सन्निपातवदिति क्रम इति। ननु
युगपन्मरणं कथमिति चेत्राह युगपन्मरणं तत्र संबंधानां सन्निपातेन आगतः। पश्चानां सपि-
डानां युगपन्मरणं यदि तत्र संबंधासन्निपातागतः। आम्रतिवशात् क्रमेण श्राद्धं कुर्यात्।

पत्नीपतित्वलक्षणसंबंधस्यासत्त्वात्॥ पत्न्याः प्रथमं श्राद्धं कुर्यात्॥ अनंतरमुभय
प्रतियोगिकपुत्रत्वलक्षणसंबंधनाशात्॥ पुत्रस्य अनंतरं पितृत्ववदिति संबंधनाशा
श्राद्धएवं तत्पुत्रादिश्राद्धमपहनीयं तदा लक्षणश्राद्धं गतः॥ माताद्यादिसपिंडानां युगपन्मरणं
तदा संबंधसत्त्विमालाश्च तत्क्रमाच्छ्राद्धमाचरेदिति॥ ननु पत्न्यादीनां पित्रादेश्च संघा
तमरणे कथमित्यत्राह॥ पत्न्याः पुत्रस्य तत्पुत्रा भ्रात्रा स्तत्तनयस्य वा स्नुषाश्च श्राद्धं पि
त्रादेश्च संघातमरणं यदि अवगिह्यान्माता पितृपूर्वं सापिंड्यमाचरेत्॥ तत्पुत्रः पुत्रपु
त्रः तत्तनयाद्भ्राता तत्तनयः श्वसा श्वशुरा अनुजाश्च॥ पित्रा मातापितामहपत्न्यादीनां पि
त्रादेः क्रमेण युगपद्वा संघातमरणं यदि स्यात् तदा संवत्सरादर्वाक् माता पितृसापिं
डपूर्वकं सापिंड्यं कुर्यात्॥ तत्र हेतुः॥ माता भ्राता च तत्सुतः पत्नीपुत्रस्नुषाश्वसा॥१॥ १२५

भ्राता वर श्राद्धमाद्य पुनः पुनः॥ पितुरिति॥ संवत्सरवृद्धिपर्यंतं॥ पेदमेक्षि कर्तु
रेषु धातुः प्रतिप्रसवार्थमर्वाग्वृद्ध्यादिषु कं सपिंडीकरणनिषेधात् तत्प्राप्तस्य सापिंड्या
ग्रहणं॥ पत्न्या अनंतरं माता पितृभ्रातामरणक्रमेणैव श्राद्ध प्रसाङ्क्षीत नि...
माता पितृपूर्वमित्युक्तं॥ सपिंड्यालाकाद्धरणाविशेषउक्तः॥ पत्नीपुत्रस्नुषापौत्र भ्रातृ
तत्पुत्रका अपि॥ पितरौ चयद्येकस्मिन्म्रियेयातां सह तदा आद्यमेकादशाहे कुर्या
द्विपाकस्तत्पिंडतमिति॥ ननु पत्न्यादितिरिक्तानां पित्रादेः संघातमरणे दहना
दिकमाद्यश्राद्धपर्यंतं कृत्वा ऊनमासिकश्राद्धपूर्वकं सपिंडीकरणं संवत्सरं स्यात्
कुर्वीत॥ तदाह हारीतः॥ मन्वयुरुनिपातात् तत्पितृकार्यं यथाविधि॥ कुर्यात् संवत्सराद्वापि

नेकाहिष्टं न पार्वणमिति। नन्वनेकाहिष्टमिति सामान्यनिषेधाद्द्यश्राद्धं कथं
तिथ्यभावानां आद्यश्राद्धमध्ये श्राद्धानि क्रियादिकादशाहनिर्विशेषवचनबाध इति न।
उपपत्तिः। लोकाक्षिरपि। आशौचावृत्तकार्याणि महागुरुनिपातने कुर्यात्संवत्स
रादर्वाक् श्राद्धमेकं तु कुर्वीयदिति। यत्तु दक्षवचनं पितृमाहिष्टमातायस्त्रादि दत्तस्था
श्वचिन्निवृत्तिनादेवं नापि पिण्डं च यावद्वत्सरास्म निवसरः। दानानां चैव महादानं श्राद्धमयं
चाग्नितर्पणं प्रक्षामहूनकं वर्षं महागुरुनिपातन इति। ततान्यादिष्टित्तिरिक्त सपिंड
विषयं। यत्तु जाबालिवचनं पत्नीत्वेवभ्राता तात्राता स्नुषाचैव विपद्यते। तत्र श्राद्धं निव
र्तेतन पित्रा हृतायारथीति। तद्दादशाहश्राद्धनिषेधपरं। पित्रोः संघातमरणे कथं
मियत्राह। पित्रोः संघातमरणे मातुरग्रतः वादिना। अनुयानमृताते श्राद्धं यथाकालं स १२०

माचरत। पितृमति पित्रोः संघातमरणे मातुः पतिमरणदिनादुत्तरदिने पि अ
नुगमनमरणे यथाकालं तद्दशाहे सापिंडं कुर्यात्। तदाह दक्षः। पित्रोरूपर
मपुत्राः क्रियाकुर्यात्तायारपि। अनुगतिं च नाम्नोषां संघातमरणे पिता इति। यत्तु
लोकाक्षिवचनं। पितर्युपरते पुत्राः मातृश्राद्धान्निवर्तते। मातर्यपि हतायां पितृश्रा
द्धान्निवर्ततइति। तच्च कागतिरित्यत्राह। निवृत्तिवचनं यत्तत्संघातमृतौ नावती पि
तर्युपरत इति। तन्निवृत्तिवचनं तत्संघातमरणविषयं अनुयानमरणविषयं चेति दा
